# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा - अक्टूबर - 2019

**कक्षा – शास्त्री (SEM-5) (Old)** | **प्रश्नपत्रम् – 1** | गुणाः –70

विषयः – अनिवार्यसंस्कृतम् | **कोड –C.F.3.5.5** | समयः - 3 तः 6 पर्यन्तम्

दिनाङ्कः –09/10/2019 सन्दर्भग्रन्थः – उत्तररामचरितम्

---

**प्र. क्र.** **प्रथमान्वितिः (Unit 1)** गुणाः

**प्रश्न १ निम्नाङ्कितेषु द्वयोः ससन्दर्भं व्याख्या कार्या ।** १०

१ कन्यां दशरथो राजा शान्तां नाम व्यजीजनत् ।
अपत्यकृतिकां राज्ञे लोमपादाय यां ददौ ॥

२ जामातृयज्ञेन वयं निरुद्धास्त्वं बाल एवासि नवं च राज्यम् ।
युक्तः प्रजानामनुरञ्जने स्यास्तस्माद्यशो यत् परमं धनं वः ॥

३ स एष ते वल्लभबन्धुवर्गः प्रासङ्गिकीनां विषयः कथानाम् ।
त्वां नामशेषामपि दृश्यमानः प्रत्यक्षदृष्टामिव नः करोति ॥

**प्रश्न २ निम्नलिखितयोः एकस्य सविस्तरम् उत्तरं लेख्यम् ।** १०

१ उत्तररामचरितप्रणेतुः परिचयं लिखत ।

२ “उत्तरे रामचरिते भवभूतिर्विशिष्यते” ।

**द्वितीयान्वितिः (Unit 2)**

**प्रश्न ३ अधोलिखितेषु कयोश्चिद् द्वयोः सप्रसङ्गं व्याख्या कार्या ।** १०

१ दत्ताभये त्वयि यमादपि दण्डधारे सञ्जीवितः शिशुरसौ मम चेयमृद्धिः ।
शम्बूक एष शिरसा चरणौ नतस्ते सत्सङ्गजानि निधनान्यपि तारयन्ति ॥

२ पश्यामि च जनस्थानं भूतपूर्वखरालयम् ।

प्रत्यक्षानिव वृत्तान्तान्पूर्वाननुभवामि च ॥

३ वज्रादपि कठोराणि मृदूनि कुसुमादपि ।

लोकोत्तराणां चेतांसि को नु विज्ञातुमर्हति ॥

**प्रश्न ४ निम्नलिखितयोः एकस्य सविशदम् उत्तरं लिखत ।** १०

१ सतसङ्गजानि निधनान्यपि तारयन्ति ।

२ द्वितीयाङ्कस्य सारांशः ।

## तृतीयान्वितिः (Unit 3)

**प्रश्न ५ अधोलिखितेषु कयोश्चिद् द्वयोः सप्रसङ्गं व्याख्या कार्या ।** १०

१ वीचीवातैः शीकरक्षोदशीतैराकर्षद्भिः पद्मकिञ्जल्कगन्धान् ।

मोहे मोहे रामभद्रस्य जीवं स्वैरं स्वैरं प्रेरितैस्तर्पयेति ॥

२ त्वमेव ननु कल्याणि सञ्जीवय जगत्पतिम् ।

प्रियस्पर्शो हि पाणिस्ते तत्रैष निरतो जनः ॥

३ पूरोत्पीडे तटाकस्य परीवाहः प्रतिक्रिया ।

शोकक्षोभे च हृदयं प्रलापैरेव धार्यते ॥

**प्रश्न ६ अधोलिखितयोः एकस्य सविस्तरम् उत्तरं लिखत ।** १०

१ तृतीयाङ्कस्य सारांशः ।

२ श्रीरामचन्द्रस्य चरित्रचित्रणम् ।

**प्रश्न ७ दशप्रश्नानाम् एकैकवाक्येन उत्तराणि लिखत ।** १०

१ ब्रह्मादयः किमर्थं तपः तप्तवन्तः ?

२ अष्टावक्रः कस्याश्रमात् आगतः ?

३ बन्धुजनविप्रयोगाः कीदृशाः भवन्ति ?

४ प्रथमाङ्कस्य नाम किम् ?

५ रामस्य कुलगुरुः कः ?

६ रामस्य भगिनी का ?

७ पर्वतस्य नाम किम् ?

८ दण्डकायां रामेण कति राक्षसाः हताः ?

९ "सांसारिकेषु च सुखेषु वयं रसज्ञाः" कस्योक्तिः ?

१० 'पञ्चवटी' शब्दस्य समासविच्छेदः कः ?

११ द्वितीयाङ्कस्य नाम किम् ?

१२ वसिष्ठर्षेः पत्न्याः नाम किम् ?

१३ रामं मोहः कथम् आवृणोति ?

१४ आनन्दग्रन्थि एकः कः ?

१५ 'उत्तररामचरितम्' ग्रन्थकारः कः ?